कजरूपेणगंधवत्वानुमानात्तु॥यद्वावज्रादिभस्मनिगंधवत्वोपलंभात्तत्रमाद्यद्गंध
वत्वमनुमीयते॥अतएववज्रोधारेभकइति॥तत्रापिगंधवत्वसिद्धिः॥नचजलादावति
व्याप्तिः॥तत्रगंधवत्वस्यपंकजादिपार्थिवोपाधिनिमित्तत्वात्तु॥अस्यव्यंजकमाह॥सीत
स्यस्निग्धेति॥स्निग्धत्वंअस्यव्यंजकमित्यर्थः॥यद्वालक्षणांतरं॥तत्रस्निग्धत्वस्यपृ
थिव्यादावतिव्याप्तिः॥अतउक्तंस्निग्धेति॥स्नेहाआपेयुक्तेसामानाधिकरण्याद्गुरु
णिनोरभेदभ्रमःस्यात्तद्वारणायस्यस्निग्धेति॥एवंस्निग्धस्यस्नेहाःसंतीतिबहुव्रीहिणा
भेदप्रतीतेर्नाभेदभ्रमोप्रसक्तीति॥नचचंद्रेतिव्याप्तिः॥तत्रहिचंद्रमंडलावयवेपं
पलब्धेजलावयवगतस्नेहसंयुक्तसमवायात्प्रतीयते॥ननुस्नेहाभावकेस्नेहः॥नचोष्ण

दकेव्याप्तिः॥तत्रापिवह्निस्पर्शेनतस्याभिभवादूष्मवत्सजातीयसंबंधस्याभिभावकत्वात्तु॥एवं
तज्जालक्षणेप्यूह्यं॥नचतेजोलक्षणंचंद्रसूर्यादावव्यापकं॥चंद्रेजलस्यस्पर्शोभिभूतस्य
सुवर्णादौतुपार्थिवस्पर्शोभिभूतस्योष्णस्पर्शस्यसत्त्वात्तु॥वायुत्वव्यंजकमाह॥अरूपेति॥
अरूपस्यस्पर्शवत्त्वंवायुत्वव्यंजकमित्यर्थः॥यद्वालक्षणांतरं॥तत्रस्पर्शवत्त्वंतेजः प्रभृतिष्वतिव्या
प्तिमतोरूपेति॥अरूपत्वमाकाशादावतिव्याप्तमतःस्पर्शवानिति॥आकाशादित्रयस्यजाते
रभावादेकंकमवलक्षणमाह॥शब्देति॥कालादावतिव्याप्तिवारणायशब्देति॥शब्दवदि
युक्तेनकोपिदोषः॥तथापितस्यभाद्यमतसिद्ध्यत्वनियमेनगुणत्वसूचनायगुणपदं॥
शब्दोगुणःबहिरिंद्रियव्यवस्थाहेतुत्वाद्रूपवदिति॥शब्दस्यगुणत्वसिद्धिरित्यर्थः॥आदि—
सपरिवर्तनंसूर्यपरिस्पंदनंनोदनाख्येपरत्वापरत्वतयोरसमवायिकारणंकालपिंड
संयोगस्तदाधारइत्यर्थः॥अनधिकरणंकालइत्युक्तेऽसंभवः॥कालस्यापिद्रव्यत्वा
धिकरणत्वात्तु॥यद्वाघटत्वानधिकरणेपटेतिव्याप्तिः॥अतउक्तंपरत्वापरत्वेति॥तयोः

पिंडनिष्ठत्वेनकालस्यतदनधिकरणत्वं॥एतावत्युक्तसमवायेतिव्याप्तिः॥अतःआधारइति॥
एवंकर्मण्यतिव्याप्तिः॥तदर्थंकारकेति॥तथाप्यनिवृत्तिः॥तस्यापिज्ञानकरणकर्मत्वाधार
त्वात्ततोसमवायीति॥कर्मणिचक्तकर्मत्वाधारत्वेप्यसमवायिकारणाधारत्वाभावान्नदोषः॥
असमवायीसाधुकेगगनादावतिव्याप्तिः॥स्वतदर्थंपरत्वेति॥एतावत्युक्तेदिक्प्रत्यक्षातिव्याप्तिः
स्वतमुक्तमादिशेति॥आधारांतंपिंडइतिन्यायकमंजरीतनेपरत्वयादि॥एतच्चपरत्वगर्भितंअ
परत्वगर्भितंलक्षणद्वयंद्रष्टव्यं॥एवंदिग्लक्षणमपिज्ञेयं॥एतावांक्तविशेषः॥कालेतिव्याप्ति
वारणायआदिशसंयोगमनुसरति॥॥छ॥॥आत्मानंलक्षयति॥आत्मेति॥आत्मत्वंसामा
न्यसंतानभावाप्रतियोगिद्रव्यवृत्त्यन्यजातिमत्त्वंसामान्यं॥तथोक्तीयर्थः॥आत्मत्वंव्यंजकमाह॥बु
द्धीति॥बुध्यनुमेयस्यतस्यभावस्तत्वं॥तच्चात्मत्वंव्यंजकमित्यर्थः॥यद्वालक्षणांतरं॥तत्रगुणः
आत्मसमवायिकारणसंभवः॥गुणवानात्मसमवायिकारणगगनादौगच्छतितद्वारणायबुध्यनुमेयेति॥गुणेति ॥३१॥
स्पष्टार्थं॥अथवाबुध्यनुमेयत्वंचभिद्यतेबुध्यनुमेयगुणपदं॥तथाचात्मनोऽनित्यत्व
प्रसंगादिति॥यद्वागुणवदितिसामान्यलक्षणानुगतिज्ञानार्थंगुणपदं॥मनसोलक्षणमाह॥

मनस्त्विति॥गगनादृत्तिस्पर्शवत्वेसतिक्रियावत्वंजातिर्मनस्त्वं॥तथोक्तीयर्थः॥
मनस्त्वंव्यंजकमाहस्पर्शेति॥स्पर्शश्चरन्यत्वेसतिक्रियाधारत्वंमनस्त्वव्यंजकमित्यर्थः॥यद्वा
लक्षणांतरं॥तत्रघटादिवारणायस्पर्शेति॥गगनादिवृत्तिसामान्यक्रियाधिकरणमिति॥क्रि
याधिकरणंतुमनसोऽनुमानादेवसिध्यं॥अन्यथामनसोविभुत्वेआत्मनोविभुत्वाभ्यांसर्व
दार्थसंबंधोधृगपत्ज्ञानानिस्युः॥बाह्येंद्रियतद्विषयासंबंधान्नेतिचेत्॥तर्हितत्तद्विषयेंद्रि
याणांयुगपत्संबंधेज्ञानयौगपद्यापत्तिः॥दृष्टमेवैतदुपादित्सक्षणादाविति चेत्॥नव्यासंगस्य
लक्षणस्यदुर्ज्ञानत्वात्तत्रापिक्रमानुमानाद्यौगपद्यप्रतीतेश्चानतिवृत्तेः॥व्यासंगोनाममनस्यन्य
त्रकृत्तिः॥तत्रहिरूपादिसकलविषयसंबंधेपिनिष्टप्तलोहपिंडेनाग्नेरिवरूपेणानुप्रवेशंग्रंथमन्यत्रवैस्प
र्शेनास्पर्शीतिसर्वानुभवोनस्याद्गुणत्वेनेंद्रियेणमनःसंबध्यतेतेनैवज्ञानेनायं
तेनान्येनेतियुक्तायोगपद्यापत्तावः॥अतःसिध्यंक्रियावत्वंमनसः॥गुणावांतरसंदानार्थंक्रि
यापदंलक्षणांतरंद्रव्यमूर्तंलक्षयति॥मूर्तत्वंतिर्यक्त्वंइंद्रियमात्रग्राह्यगुणवत्तिजातीरूप
त्वं॥तथोक्तीयर्थः॥लक्षणापक्षेगुणइत्युक्तेसतींद्रियेत्यादिवातिव्याप्तिस्तद्वारणायं
कालादिभेदंतुजातिव्यंजकमिष्यते॥एवंसर्वत्रविज्ञेयं॥अथवालक्षणांतरं॥रूपवत्ति ४२॥

ग्राह्यति॥ ग्राह्यो गुणो रूपमिति सुकेन सादौ अतिव्याप्तिमत्तदुक्तं चक्षुग्राह्यति॥ एवमप्यक्तेसंयो गादौ अतिव्याप्तिमत्तदुक्तं मात्रेति॥ संयोगादेर्द्रव्यग्राह्यत्वान्न चक्षुमात्रग्राह्यत्वं॥ रूपत्व प्रसंगवारणाय गुणेति॥ संपूर्णमपि लक्षणं प्रभाकुर्यां संयोगेति व्यापकं॥ ततोविशेष गुणइति द्रष्टव्यं॥ तथाच चक्षुर्मात्रग्राह्यो विशेषगुणो रूपमित्यर्थः॥ यद्वा चक्षुर्मात्रग्राह्य जातिमान् गुणो रूपमित्यर्थः॥ संयोगस्यातथात्वान्न संयोगेतिप्रसंगः॥ रूपावृत्तिर्जातेरिंद्रिय ग्राह्यगुणवृत्तिजातीयसत्वंलक्षणरूपादावतिव्याप्तिवारणाय रसनेति॥ रसनग्राह्यइयुक्त रसत्वेतिप्रसंगवारणाय गुणइति॥ पार्थिवेंद्रियग्राह्यगुणवृत्तिस्पर्शवृत्तिजाति॥ गंधत्वंत क्षणादूरसादावतिप्रसंगवारणाय घ्राणेति॥ गंधत्व जातौतद्वारणाय गुणइति॥ स्पर्शत्वंल क्षयति॥ स्पर्शेति॥ रूपत्वलक्षणावच्छेदकानवच्छिन्नायत्ता भावाधिकरणनिष्ठत्वा धिकरणद्रव्यवृत्तिविशेषगुणवृत्तिगुणत्वावांतरजातिःस्पर्शत्वं॥ ङ्जातिव्यंजकमाह॥ स्पर्शनेति॥ स्पर्शनमात्रग्राह्यगुणत्वंस्पर्शत्वव्यंजकमित्यर्थः॥ रूक्षजपक्षेस्पर्शनग्रा ह्यो गुणः संयोगापीतितद्वारणाय मात्रेति॥ स्पर्शनमात्रग्राह्यत्वंस्पर्शत्वजातावपीति॥ ॥३३॥

तदर्थंगुणइति॥ द्रोणपर्ववत्॥ एतेषुचतुर्ष्वपिलक्षणेषुतत्तदिंद्रियग्राह्यगुणत्वा वांतरजातिमत्वंनिष्कृष्यतेः॥ तेनपरमाणुरूपादिषुनाव्याप्तिः॥ चक्षुर्मात्रग्राह्यगु णत्वावांतरजातिमइंपे॥ एवमुत्तरत्रद्रष्टव्यं॥ संख्यांलक्षयति॥ संख्येति॥ गगन समवेतसामान्यगुणवृत्तिद्विष्टगुणावृत्तिपरिमाणपृथक्त्वनिष्ठैक्यतत्ताभावप्रतियोगिता वच्छेदकावच्छिन्नगुणत्वसाक्षाद्व्याप्यजातिः संख्यात्वं॥ व्यंजकमाह॥ गणनेति॥ यज्जा तीयसति यज्जातीयं ज्ञायतेऽसतिनज्ञायतेतत्तस्यासाधारणकारणं॥ यथातंतुः पट स्यैथावाकर्मसंयोगादेर्नथागणनाप्रयुसाधारणंसंख्या॥ संख्याज्ञानंप्रतिनासा धारणकारणं॥ संख्यांविनान्यस्मादपिघटादेर्ज्ञायमानत्वात्॥ संख्याज्ञानंविना प्रतिसंख्या यांप्रसाधारणकारणत्वेनतस्यागणनाप्रयुसाधारणकारणत्वंनव्यवह्रियते॥ उक्त लक्षणसत्वात्॥ नहिघटत्वरूपादिचतुर्दशगुणान्प्रतिसाधारणत्वेपिप्रयेकमसा धारणत्वंव्यवह्रियते॥ नहिघटः साधारणकारणमितिव्यवहारंतितीर्थिकाः॥किं

लीश्वरेच्छादीनां साधारणकारणत्वं ॥ तेषां सदा सत्वेपि तंत्वादिकं विनाविशेषपटादिकार्यानुदयात् ॥ तस्मात्तत्रनं प्रतिहेतुत्वेपि गगनासाधारणकारणत्वं संख्यायाइति सिद्धं ॥ परिमाणं लक्षयति ॥ परिमाणवेति ॥ संख्याऽसमवायिकारणकत्वेसतिद्रव्यसाधारणकारणकावृत्तिगुणत्वसाक्षाज्जाप्यजातिः परिमाणत्वं ॥ व्यंजकमाहमानेति ॥ मानमित्यत्तालक्षणपक्षेव्याख्यानं पूर्ववत् ॥ पृथक्त्वं लक्षयति ॥ पृथक्त्वमिति ॥ अपेक्षाबुद्ध्यसाधारणकारणासमवायिगुणावृत्तिगुणत्वेतीभावाप्रतियोगिसंख्यावृत्तिजातिः पृथक्त्वं ॥ तद्व्यंजकमाह ॥ पृथगिति ॥ पृथग्व्यवहारइदमस्मात्पृथगिति यंरूपः ॥ संयोगं लक्षयति ॥ संयोगेति ॥ द्रव्यासमवायिकारणगुणत्वेसतिव्याप्यवृत्तिप्रतियोगिगुणत्वावांतरजातिः संयोगत्वं ॥ तद्व्यंजकमाह ॥ नियइति ॥ लक्षणपक्षेसमवायेतिव्याप्तिवारणायनियतपदं ॥ द्वयादौतद्वारणायसंबंधपदं ॥ विभागं लक्षयति ॥ विभागत्वेति ॥ क्रियासमवायिकारणकद्विष्ठगुणवृत्तिसंयोगावृत्तिगुणत्वसाक्षाज्जाप्यजातिः विभागत्वं ॥ विभक्तव्यवहार॥ ३४॥

इदमस्मादिभक्तमितिप्रत्ययव्यपदेशौ ॥ परत्वापरत्वेलक्षयति ॥ परत्वेति ॥ अपरत्वगुणवृत्तिसकलपरत्ववृत्तिजातिः परत्वं ॥ परत्वावृत्तिसकलपरत्ववृत्तिजातिरपरत्वं ॥ परापरव्यवहारौ कथंतर्कजादौ सन्निकृष्टविप्रकृष्टयोश्चणंपरप्रत्ययव्यपदेशौ ॥ लक्षणापक्षेव्याख्यानं पूर्ववत् ॥ बुद्धिंलक्षयति ॥ बुद्धिरिति ॥ सुखावृत्तिसकलबुद्धिवृत्तिजातिर्बुद्धित्वं ॥ एवमुत्तरत्रजातयोबुध्याः ॥ लक्षणापक्षेआत्माश्रयइत्युक्तेसुखादावतिव्याप्तिरतआह ॥ प्रकाशइति ॥ ज्ञानादिप्रकाशनतद्वारणायात्माश्रयइति ॥ सुखंलक्षयति ॥ सुखमिति ॥ लक्षणापक्षेत्वयं ॥ सुखमित्युक्तेदुःखतत्साधनादौप्रसंगः ॥ तदर्थमनुकूलेति ॥ एवंसतिसुखसाधनेप्रसंगस्तदर्थंनिरूपाधीति ॥ निरूपाधित्वमनन्यद्वारत्वं ॥ सुखसाधनंतुसुखद्वारेणानुकूलमितिनातिव्याप्तिः ॥ नहिचंदनंनिदाघेसुखसाधनमितिहेतुनिरूपितयोःप्रीतावनुकूलत्वेनाप्यनुलिप्यते ॥ दुःखंलक्षयति ॥ दुःखमिति ॥ लक्षणापक्षेसुखादावतिव्याप्तिवारणायप्रतिकूलेति ॥ दुःखसाधनेऽहिकंटकादौतद्वारणायनिरूपाधीति ॥

दुःखसाधनं तु दुःखद्वेष्यत्वं प्रतिकूलमिति नात्र प्रसङ्गः॥ विषवेद्यः सर्पादिरपि गृह्यमाणत्वा
त्तेऽपि तत्प्रतिकूलत्वादर्शनादिति॥ इच्छां लक्षयति॥ इच्छात्वेति॥ अर्थ्यते प्रार्थ्यतेऽनयेत्यर्थो
ग्रहादित्वाण्णिः॥ तस्याभावोऽर्थत्वं प्रार्थनेति यावत्॥ तदेवंलक्षणं स्वरूपं यस्य सा तथा॥ स्पष्टं॥
द्वेषं लक्षयति॥ प्रज्वलनेति॥ ज्वलयतीति ज्वलनः॥ सएवात्मा यस्य स तथा॥ क्रोधरूप इ
त्यर्थः॥ प्रज्वलनात्मकत्वं यथाश्रुतं तु क्षादावतीतिगुणप्रकरणाद्गुणपदं संबन्धनीय
मिति नातिव्याप्तिः॥ यद्वा आत्मगुणप्रकरणात्तदाश्रय इति संबन्धनीयमिति॥ प्रयत्नं
लक्षयति प्रयत्नवेति॥ अहं प्रतीयते अहंकारोमीत्यादिव्यवहारः प्रयत्नव्यवहारः॥ गुरुत्वं सु
गमं॥ गुरुत्वं लक्षयति गुरुत्वेति॥ लक्षणापक्षे कारणं गुरुकत्वमित्युक्तेऽदृष्टादावतिव्याप्तिः
स्यात्तदर्थमसमवायीति॥ एवमुक्तसंयोगादौ प्रसङ्गः॥ तदर्थं पतनेति॥ पतनं नाम अधः
संयोगफलिकाक्रियातस्यासमवायिकारणमित्यर्थः॥ एतावत्युक्तेनादनादभिघाता ॥३५॥
दिसंयोगपतनहेतौ चातिव्याप्तिः॥ ततो गुरुत्वं एकवृत्तीति॥ एकवृत्तित्वं रूपादावस्तीतिपत

नेत्यादि॥ एकवृत्तिपतनकारणमित्युक्तेऽदृष्टादौ अतिव्याप्तिस्ततोऽसमवायीति॥ द्रवत्वं लक्ष
यति॥ द्रवत्वेति॥ रूपवद्भिन्नगगनावयवेक्षाबुद्ध्यजन्यसामान्यगुणवृत्तिगुरुत्वान्यगुणत्वा
वान्तरजातिः द्रवत्वं॥ लक्षणपक्षे रूपादावतिव्याप्तिवारणायस्यदनेति॥ स्यदनंश्रवणं॥ ए
तावत्युक्ते संयोगादौ॥ तदर्थमेकवृत्तीति॥ एकवृत्तित्वस्यस्यदनासमवायिकारणंचेतिविमर्शः॥
स्नेहं लक्षयति॥ स्नेहवेति॥ लक्षणपक्षेद्रवत्वेतिव्याप्तिवारणायद्रवत्वइदन्यइति॥ द्रवत्वजा
त्यनधिकमित्यर्थः॥ द्रवत्वंइदन्यइत्युक्ते रूपादौ प्रसंगः ततः संगृहेति॥ संगृहीतानां रूपादीनां
गुणानां॥ अदृष्टादावतिव्याप्तिवारणायसाधारणइति॥ संस्कारं लक्षयति॥ संस्कारवे
ति॥ स्वस्यसंस्कारेस्यात्रौद्रव्यस्यभावच्छेदकस्याःआपादकःसंस्कारोक्तद्रवाभावनास्खि
तस्थापकरूपस्त्रिविधोपिस्थितिसमयावच्छेदकद्रव्यस्यप्रतिपादयति॥ तत्रवेगभ्रमणावच्छे
दकभावनाज्ञानावच्छेद्यं॥ स्थितस्थापकोवृक्षनाद्यवच्छेद्यंप्रतिपादयतीत्यर्थः॥ संस्कारोस्य
व्यस्थापादकत्वं तदाधारद्रव्यस्याप्यस्तीति॥ तद्वारणायगुणइति॥ गुणःसंस्कार

इत्युक्तेयमिदमिति प्रसंगस्तदर्थमापादक इति ॥ आपादकत्वं कारणत्वं ॥ परमाणुपरिमाणं तच्च नकारणमिति नदोषाभवति ॥ एवमित्युक्तेपरादिस्वरूपापादकतुल्ययोगादावतिव्याप्तिस्तदर्थमवस्थेति ॥ एवमपिसंयुक्तत्वावस्थापादकसंयोगेतिव्याप्तिस्तदर्थमुक्तीति ॥ एवमपिरूपादावतिव्याप्तिरतःस्वेति ॥ धर्मलक्षयति ॥ धर्मेति ॥ लक्षणपक्षेऽधर्मेतिव्याप्तिवारणायसुखेति ॥ सुखकारणंधर्मइत्युक्तेरीश्वरादौप्रसंगः ॥ तदर्थमसाधारणेति ॥ अधर्मंलक्षयति ॥ अधर्मेति ॥ लक्षणपक्षेधर्मेतिव्याप्तिवारणायदुःखेति ॥ ईश्वरादौप्रसंगवारणायासाधारणेति ॥ द्वेष्टिलक्षयति ॥ द्वेष्टेति ॥ गगनादौतिव्याप्तिवारणायगुणवृत्तिरूपावृत्तिजातिःद्वेष्टत्वं ॥ लक्षणपक्षेसुखवदावतिव्याप्तिवारणायश्रोत्रग्राह्येति ॥ श्रोत्रग्राह्यत्वंद्वेष्टइत्युक्तेरूपादौप्रसंगः ॥ तेगुणइति ॥ गुणलक्षणेप्रमाणमुक्तमेव ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ इतिमित्रभाषिण्यांगुणपदार्थःसमाप्तः ॥ ॥ ७ ॥ कर्मवांतरभेदानुलक्षयति ॥ उक्षेपणेति ॥ ऊर्ध्वसंयोगहेतुक्रियावत्तिकर्मेतिवावांतरजातिरुक्षेपणत्वं ॥ एवमुत्तरत्रापीदं ॥ अपक्षेपणादावतिव्याप्तिवारणायकर्मेतिऊर्ध्वदेशसंयोगेति ॥ कारण ॥ ३६ ॥

मित्युक्तेरुक्षेपणादावतिव्याप्तिवारणायकर्मेति ॥ उक्षेपणेतिव्याप्तिवारणायाधोदेशसंयोगेति ॥ त्रोपंपूर्ववत् ॥ विनस्यंदवस्थागतेकर्मण्यनाकुंचनेतिव्याप्तिवारणायादृष्टमिति ॥ अपक्षेपणादावतिव्याप्तिवारणायवक्रत्वेति ॥ आकुंचनाधारइतरत्तदर्थंकर्मेति ॥ कर्मण्यतिव्याप्तिवारणायकर्मत्वेति ॥ त्रोपंपूर्ववत् ॥ अन्यत्रकर्मण्यतिव्याप्तिवारणायानियतदेशेति ॥ सामान्यभेदयोर्लक्षणमाह ॥ व्यापकेति ॥ व्यापकमात्रपरमिसुकेगगनादावतिव्याप्तिः ततोवकिसामान्यमिति ॥ व्यापकंसामान्यंपरमिसुकेपरापरेतिव्याप्तिरतोमात्रेति ॥ व्याप्यंसामान्यमपरमिसुकेपरापरेतिव्याप्तिरतोमात्रेति ॥ व्याप्यमात्रमिसुकेअसंभवःतदर्थंसामान्यमिति ॥ व्याप्यव्यापकमिसुकेवस्त्वादावतिव्याप्तिरतउक्तंसामान्यमिति ॥ त्रोपंसुगमं ॥ ८ ॥ विशेषसमवाययोरनवांतरभेदाभावादभावभेदानुलक्षयति ॥ अनादिरिति ॥ गगनादावतिव्याप्तिवारणायसांतइति ॥ घटादौतद्वारणायानादिरिति ॥ रूपादावतिव्याप्तिवारणायानंतइति ॥ अनादिरनंतोभावोसंताभावइत्युक्तेपुनरन्योन्याभावःततःसंसर्गेति ॥ निषेधइत्युक्तेप्रागभावादावतिव्याप्तिरतउक्तंनादात्मेति ॥ घटःपट

नश्यतीति घटपटतादात्म्यमात्रेऽप्यनिष्पन्नतादात्म्यनिषेधइत्यर्थः॥ नित्यापरमाणु रूपस्त्रानित्यत्वंलक्षयति॥नित्यत्वमिति॥विरहोनित्यत्वमित्युक्तेनित्यत्वविरहेअनित्यत्वेति व्याप्तिरतउक्तंप्रध्वंसेति॥प्रध्वंसेतिव्याप्तिरारब्धायविरहेति॥प्रध्वंसत्वंतत्प्रतियोगित्वं प्रध्वंसोपलक्षितसत्ताप्रतियोगित्वमित्यर्थः॥यरमाद्वुलक्ष्यतेनिरवयवइति॥घटेति व्याप्तिरारब्धायनिरवयवइति॥गगनेतद्वारब्धायाक्रियावानिति॥मनसोऽप्यणुपरिमाणवत्वेनलक्षत्वाज्जातिव्याप्तिः॥यद्वामनोलक्षणेस्पर्शशून्यत्वविशेषणात्॥अत्रस्पर्शविवक्षितं॥निरवयवत्वंावयवनिरूप्यत्वादवयवंलक्षयति॥द्रव्येति॥अंशावयविघटादावतिव्याप्तिरारब्धायद्रव्येति॥द्रव्यकारणमित्युक्तेईश्वरादौततःसमवायीति॥ रूपंसुगमं॥रूपीयलक्षणेअंशावयविज्ञानायलक्षणमाह॥द्रव्येति॥यद्यप्यद्रव्यणंतरंलक्षणेस्यवक्तव्यत्वात्तु॥गुणीयलक्षणानंतरंभोगादिवदसंतावयवीलक्षयितुमुचितः॥तथाप्यत्रद्रव्यपदव्यवच्छेद्यत्वेनप्राप्तत्वात्तु॥दहलीप्रदीपन्यायेनउभयत्रोपकारणत्वेनलक्षितत्वंदोषः॥द्रव्यमंशावयवीत्युक्तेपरमाण्वादावतिव्याप्तिः॥ततःकार्येति॥एवमुक्तेऽणु ॥३७॥

कादौततोऽनारंभकमिति॥अनारंभकंकार्यद्रव्यमंशावयवीत्युक्तेऽसंभवःतदर्थंद्रव्येति॥द्रव्याअनारंभकमितिसूत्रेरूपादौततोद्रव्यमिति॥द्रव्याअनारंभकंद्रव्यमितिसूत्रेगगनादौततःकार्येति॥प्रागभावइतिप्रागभावप्रतियोगिकार्यमित्यर्थः॥अन्यथाकार्योत्पत्तिरनंतरंप्रागभावाभावात्तिगुभावइवसंभवइतिस्यात्॥ततःभोगेति॥भोगंवक्ष्यमाणलक्षणास्यायतनंअंशावयवीत्युक्तेघटेतिव्याप्तिः॥तदर्थंआयतनेति॥एवमप्यनिवृत्तिः॥तस्यापियत्किंचिदायतनेत्यनेनु॥अतउक्तंभोगेति॥यदातुवक्ष्यमाणलक्षणानुसार्यायतनंतदातुनैवव्यावृत्तिरित्यर्थोभोगपदंस्वरूपकथनायैव॥यदात्वायतनपदमाधारवाचि॥तदासार्थकमितिमंतव्यं॥अथवावक्ष्यमाणलक्षणंभोगायतनस्यैवलक्षणंनायतनमात्रस्येतिभोगपदंसार्थकं॥भोगायतनमित्युक्तेमनस्यतिव्याप्तिः॥तदवच्छिन्नोयात्मनिभोगजननात्तु॥ततउक्तंअवयवीति॥एवंचदहस्तादावतिव्याप्तिरतउक्तंअंशेति॥भोगलक्षणमाह॥सुखेति॥सुखत्वंनभोक्तरिसमवेतंयेसुखदुःखतयोरन्यतरस्यसुखस्यदुःखस्यवायःसाक्षात्कारः

सम्भोगदृसर्थः॥ साक्षात्कारो भोग इत्युक्ते घटसाक्षात्कारोऽपि भोग स्यात्॥ अतउक्तं सुखेति॥ एवं च दुःखसाक्षात्कारेऽतिव्याप्तिस्ततो दुःखेति॥ एवं चासंभवः॥ सुखदुःखयोर्युगपत्साक्षात्कारो भावात्॥ क्रमेणतयोः साक्षात्कारेऽननुगमः॥ उभयत्रानुगतधर्मस्यैकस्याभावात्॥ अतउक्तमन्यनिष्ठेति॥ अन्यद्वन्द्वं तदन्योन्यं वा उभयत्रानुगतमित्यर्थः॥ सुखदुःखान्यतरसाक्षात्कारेऽतिव्याप्तिरतउक्तं आत्मनइति॥ ईश्वरस्यानीश्वराधभावेनतज्ज्ञान्याद्दृष्टाभावात्॥ तद्धीनयोः स्वसमवेतयोः सुखदुःखयोरभावान्नतत्साक्षात्कारईश्वरस्यासाध्यः॥ आयनेलक्षयति॥ यदवच्छिन्नइति॥ येनज्ञानादिनावच्छिन्नोसंबंधोआत्मनिभोगोजायते॥ तच्छरीराद्यायतनमित्यर्थः॥ आत्मनिअतिव्याप्तिवारणायदवच्छिन्नइति॥ ज्ञानीश्वरावच्छिन्नोव्यत्रभोगादभावादसंभवमाशंक्योक्तं नीति॥ इंद्रियंलक्षयति॥ साक्षात्कारीति॥ साक्षात्कारोनीतिसाक्षात्कारी॥ तच्चतज्ज्ञानंचतत्कारणंसाधकंमित्यर्थः॥ करणमिंद्रियमित्युक्तेऽपि दृक्क्रियाकरणेकुठारादावतिव्याप्तिरतोज्ञानेति॥ एवंधर्मादिलिंगेऽतउक्तंसाक्षात्कारीति॥ साक्षात्कारिणइति करणमित्युक्तेनकोपिदोषः॥ तथापिसाक्षात्धर्मविषयनिष्ठेनज्ञाननिष्ठ

तिमतंनिरसितुंज्ञानसामानाधिकरण्यनिर्देशइतिमंतव्यं॥ निरासक्तसाक्षात्वस्यविषयनिष्ठेघटंसाक्षात्करोमीतिज्ञानगतत्वेनानुभवोनस्याश्रवसायस्येतदकारतप्रसंगाच्चेति॥ यद्वासाक्षात्करिष्यदस्यचक्षुरादावतिव्याप्तिवारणायज्ञानपदं॥ भोगकारणंविषयइत्युक्तेआत्मन्यतिव्याप्तिरतउक्तंआत्मनइति॥ आत्मनःसंबंधीयोभोगःतस्यकारणमित्यर्थः॥ तथाचात्मातिरिक्तंकारणंप्रतीयतेराज्ञोधनस्यस्वामीतृत्वेनइत्युक्तेराज्ञातिरिक्तःप्रतीयते॥ तदीयधनस्वामीतद्वदित्यर्थः॥ एवमयीश्वरादौप्रसंगस्ततोसाधारणेतिद्रष्टव्यं॥ ज्ञायमानइतिपाठेइंद्रियादौप्रसंगवारणायतद्विशेषणं॥ ईश्वरादेरप्यनेनव्यावृत्तिस्तदा॥ गंधवत्वेसत्यात्मनोभोगकारणंपार्थिवोविषयः॥ स्नेहवत्वेसतिआत्मनोभोगकारणमाप्योविषयइतिस्वयमूहनीयं॥ तेजसानांविषयत्वेदानींलक्षणमाह॥ पार्थिवेतिं॥ घ्राणादिरादावतिव्याप्तिवारणायपार्थिवेत्युक्तं॥ इंधनंदीपकः॥ एवंचसौदर्यतिव्याप्तिरपिकरणायमानेतिं॥ तस्यचज्ञितपीताक्षभयंधनत्वानदोषः॥ तेजःपदाभावेनिषादस्थपतिंन्याये

नकर्मधारय एवस्यात्तथा चाऽसंभवः॥ ततो न लुप्ता हि समासज्ञापनायते जः पदं॥ निषादस्वच्छपतिं न्यायतेवं॥ एतयानिषादस्वच्छपतिं जयेदितिश्रूयते॥ तत्र कुंदेदः निषादानां स्वच्छपतिं स्वामिनं इतिषष्ठीतत्पुरुषः॥ निषादं चतं स्वच्छपतिं चेतिकर्मधारयः॥ तत्र पूर्वपक्षः षष्ठीसमासे [illegible] वेति॥ तथा च सति निषादानां कश्चित्स्वामी प्रसिद्धो ब्राह्मणादिर्योऽनीयः॥ सचकर्मण्यधिकृतः अर्थित्वात्समर्थत्वात्पर्युदस्तत्वाच्च॥ कर्मधारये तु अनधीतवेदः शूद्रोऽधिकारीवाच्यः॥ तच्चायुक्तं॥ अपशूद्राधिकरणविरोधादिति प्राप्ते॥ उच्यते॥ षष्ठीसमासाश्रयेणषष्ठ्यर्थलक्षणापन्नैः॥ लक्षणाहि जघन्यावृत्तिः॥ नचलुप्तषष्ठीबोधयीष्यतिलोपस्याभावरूपतयाऽबोधकत्वात्॥ कर्मधारयेतु नलक्षणाद्वितीयायाश्रूयमाणत्वात्॥ सामानाधिकरण्यश्रुतेर्बलीयस्त्वाच्च॥ प्रथमपदस्यापि तत्रापि नविभक्तिः श्रूयतइतिचेन्न॥ अभेदेहि विशेषणविशेष्ययोरेकैव विभक्तिः साश्रूयमाणा उभयत्रसंबध्यते॥ अतोनाश्रुतविभक्तिकल्पनान्यायतः कर्मधारये॥ त्वन्मतेत्वश्रुतापष्ठीकल्पनीया॥ ततोगौरवं॥ नचाध्यायनाभावादनधिकारोनिषादस्यैतद्विधिनलादेवैतद्विधेर्यावत्पदापेक्षितपाठनानुज्ञानात्॥ यथावर्षासुरथकारोग्नीदधीतेत्यत्र॥ नचापशूद्राधिकरणविरोधः॥ ॥३९॥

तस्यस्वच्छपतिनिषादव्यतिरिक्तविषयतेनाधिक्यवसानासामान्याद्विशेषस्यबलीयस्त्वात्तु॥ तस्मात्कर्मधारयबलात्तु॥ स्वच्छपतिनिषादएवंगौरेष्वगजेनतसिद्धं॥ याजनस्यवृत्तित्वेनप्रमत्ताधाज्ञयेदितिविभक्तिनिपरिणामात्तु॥ तेजोदिव्यमित्युक्तौभौमादावतिव्याप्तिरतोऽजलेधनमितिं॥ एवंचोदर्यंअतउक्तंमात्रेति॥ त्रोषंपूर्ववत्तु॥ पूर्वोक्तयोरभावयोरतिव्याप्तिवारणायपार्थिवंजलेधनमिति॥ आकरजस्यस्वरूपमाह॥ नचेति॥ आदिग्रहाद्रजततामाकीस्यचमुद्गादयोगाह्याः॥ औपाधिककालभेदस्यलक्षणमाह॥ सकलेति॥ योगपद्यमुसत्तिरित्युक्तेघटपटयोर्योगमुसत्तिः स्यादतउक्तंकारणेति॥ द्वित्रिकारणानांमेलनेऽतिव्याप्तिरतउक्तंसकलेति॥ ननुयोगपद्यंकथमुसत्तिमत्तदनंतरभावित्वादुसत्तेरितिचेत्॥ मैवं॥ उसत्तिनंतरोधात्मलाभः नत्वात्मलाभएवोसत्तिरितोऽकमुक्तयोगपद्यमुसत्तिरिति॥ योगपद्यंलक्षयति॥ अनेकेषामिति॥ संबंधोयोगपद्यमिसुक्तेघटपटसंबंधेनिव्याप्तिरतःक्षणेति॥ एवमेकस्मिन्नेकक्षणसंबंधेऽतएकेषां॥ एवमप्येकस्मिन्नेकक्षणसंबंधेऽतोनानेकेषामितिप्रसंगागतंलक्षणंलक्ष्यति॥ विभागेति॥ विभागानुसाधोयेकर्मविच्छिन्नविभागः कर्मजः तस्मिन्यः प्रागभावः तेनसंबंधयकर्मतेनअविच्छि

पद्य

नोयः कालः सक्षणइत्यर्थः॥ कालः क्षणइत्युक्ते सकलकालस्य क्षणत्वापत्तिरतो अवच्छिन्नेति॥
एवंचपक्षाद्योत्पत्तादौ ततः कर्मेति॥ एवमपिद्वित्रिक्षणेषुकर्मसंयुक्तेघटेसंबंधेति॥ तथापिघट
पटसंबंधद्वित्रिक्षणेष्वतिव्याप्तिरतः प्रागभावेति॥ एवमपिघटप्रागभावसंबंधकर्मावच्छिन्नेऽ
तिव्याप्तिरतोविभागेति॥ तथापिविभागजविभागप्रागभावसंबंधकर्मावच्छिन्नेक्षणचलुप्ते ये
तिव्याप्तिरतोविभागानुसाधेति॥ विभागानुसाधविभागप्रागभावसंबंधइत्युक्तेप्रागभावस्या
पिनदुकालव्याप्तिरात्तत्रातिव्याप्तिरतःकर्मेति॥ एतदुक्तंभवति॥ विभागप्रागभावः कर्मणःपूर्व
मपिवर्तते॥ कर्मतुविभागोत्पत्यनंतरमपितत्रक्रियोत्पत्तिसमयेविभागप्रागभावकर्मणोयः
समुच्चयःतदाधारकालःक्षणइति॥ अथवाकालोपाध्यव्यापकःकालोपाधिक्षणइति॥ क्षणमात्रावस्थायिक्षणिकमितिप्रसंगादुक्तः॥ स्थितिंलक्षयति॥ स्थितिरिति॥ किंतद्वर्तमानत्वमतआह॥तच्चे
ति॥ प्रागभावसंबंधोयोयंस्वस्यघटादिकार्यस्याभावःतेनरहितंयत्स्वरूपंतद्भवंवर्तमानत्वमित्यर्थः॥ स्वरूपवत्वंवर्तमानत्वमित्युक्तेविनाद्रव्यमितिव्याप्तिरतोऽभावरहितेति॥ यस्यकस्याप्यभावरहितस्वरूपवत्वंविनाद्रव्यमित्युक्तेतत्रातिव्याप्तिरतोविनाद्रव्यसमवायीति॥ विनाद्रव्यस्याभावात्तत्राभावान्नदोषः॥ एवंरूपत्वंवर्तमानत्वमित्युक्तेविनाद्रव्यमितिव्याप्तिरतोवदति॥ प्रागभावसंबंधेति॥ उक्तिरुक्तसकलकारणायोगपद्यरूपासाऽवर्तमानघटादेः
प्रागभावसहितैवेतिनप्रागभावसंबंधस्याभावरहितेतिनदोषः॥ वर्तमानत्वस्यस्थितेर्वाक्षणो
त्तरमाह॥ स्वकार्येति॥ प्रागभावसंबंधत्वंविनाद्रव्यमित्युक्तेविनाद्रव्यसमवायीतिव्याप्तिरतऽ
विनाद्रव्यायोक्तस्वनिष्टकार्याभावान्नतत्प्रागभावत्वमित्यर्थः॥ विनाद्रव्यंक्षणंस्थास्नु॥ नित्य
ज्ञानादिमत्वादिधर्मस्यात्मनोक्षणंस्थास्नुमितिमैवाजीवस्यक्षणमाह॥ शरीरेतिं॥ ईश्व
रेतिव्याप्तिवारणायशरीरसंबंधेनेति॥ शरीरसंबंधइत्युक्तेगगनादौतत्तोज्ञानत्वमि
तिव्याप्तिरात्मेति॥ प्रत्येकमात्मनिसमवेतौयौधर्माधर्मौताभ्यामुपगृहीतत्वंप्रात्मनिष्ठत्व
मित्यर्थः॥ उपगृहीतत्वंप्रात्मनिष्ठत्वमित्युक्तेघटपटयोर्गृहीतत्वादावतिव्याप्तिरतोऽध
र्मेति॥ एवंचनारकशरीरेतोधर्मेतिधर्मोपिगृहीतमित्युक्तेदेवादिशरीरेतस्यकेव
लधर्मजन्यत्वादतोऽधर्मेति॥ धर्माधर्मयोरेवाभावाद्धर्माधर्मोपिगृहीतत्वमसंभ

वीयत आह ॥ प्रयात्मसमवेतेति ॥ एकः सुखी ऽपरोपि दुःखयोः प्रयात्मनियतत्वात्तत्कारणा
त्वेन धर्माधर्मविष्णोरन्यभ्युपगंतव्यादिसर्थः ॥ सिताधेनुत्वपर्यंतानां तज्जातियोगित्वमवल
क्षणं ॥ जातिश्च ॥ कपिलाकर्तृसकलसितकर्तृत्वावांतरजातिः सितत्वमिसाधूक्ता ॥ संयो
गश्चेदं लक्षयति ॥ कर्मासमवायीति ॥ संयोगजसंयोगेतिव्याप्तिवारणाय कर्मेति ॥ कर्मासमवा
यीसुकेविभागेतिव्याप्तिरतोवक्ति संयोगेति ॥ संयोगासमवायिकारणाः संयोगजः इत्युक्तेपटा
दावतिव्याप्तिः ॥ तत्स्यापितंतुसंयोगासमवायिजन्यत्वात् ॥ अतः संयोगइति ॥ संयोगमात्रेकर्म
जोपि भवतितद्वारणाय संयोगासमवायीति ॥ एवंविभागलक्षणेपि व्याख्येयं द्रष्टव्यं ॥ तत्रफल
पतनादावतिव्याप्तिवारणायविभागइति ॥ आदिसपरिवर्तनंतपनपरिस्पंदसंयोगासा
धमितिविग्रहः ॥ दिक्कृतेऽतिव्याप्तिवारणायादिपदं सादि ॥ आदिसपरिवर्तनोत्पादेनादिसंयो
गेतिव्याप्तिवारणायपरत्वापरत्वइति ॥ आदिमसंयोगानुत्पाद्यतेपि भवयतोवक्ति ॥
परत्वापरत्वमिति ॥ कालकृतेतिव्याप्तिवारणायादिपदं सादि ॥ बुद्ध्यादितरभेदातुलक्षयति ॥ भा
वनेत्यादिना ॥ भावनासंस्कारः सासाधारणकारणकायस्यतत्तथातच्चततज्ज्ञानेचेतिविग्रहः ॥

ज्ञानंस्मृतिरित्युक्तेऽनुभवेतिव्याप्तिरतोऽसाधारणकारणेति ॥ एवमप्यनिवृत्तिः ॥ अनुभव
स्यापिप्रमाप्रमारूपस्यगुणदोषासाधारणकारणजन्यत्वादतोभावनेति ॥ भावनाव्यवहारेति व्याप्ति
वारणायज्ञानेति ॥ भावनाकारणंज्ञानमित्युक्तेप्रत्यभिज्ञानेतिव्याप्तिरतोसाधारणेति ॥ प्रत्य
भिज्ञातुइंद्रियसन्निकर्षासाधारणकारणकत्वेसदोषः ॥ स्मृतिरूपोदन्यस्मृतिरूपघटादौ
स्मृतौचेतिव्याप्तिवारणायज्ञानास्मृतिपदे ॥ प्रमाणलक्षणेपि घटादौसंशयादावतिव्या
प्तिरतोनुभवपदे ॥ एवमप्रमाणलक्षणमपिअनध्यवसायंनिश्चयज्ञानंतदन्यंवेदनंवधार
यंतच्चततज्ज्ञानंचेतिविग्रहः ॥ प्रमाइतिव्याप्तिवारणायानवधारणेति ॥ घटादौतद्वा
रणायज्ञानेति ॥ ज्ञानंविपर्ययइत्युक्तेप्रमाण्यमतिव्याप्तिरतोतच्चेति ॥ एवंचसंशया
अतोऽवधारणरूपेति ॥ अवधारणरूपमित्युक्तेपिप्रमायामतोऽतच्चज्ञानमिति ॥ अ
तच्चावधारणमित्यवलक्षणं ॥ ज्ञानपदंस्पष्टार्थं ॥ अज्ञायैकारणाभिंद्यंतेनज्ञा
न्यस्तत्त्वानुभवइतिविग्रहः ॥ तत्त्वानुभवःप्रत्यक्षमित्युक्तेऽनुमितौप्रसंगःस्मृतौज्ञा

यमानेत्यादि॥अज्ञायमाने साध्यके इंद्रियसंयोगादावतिव्याप्तिरतस्तत्तत्सानुभवइति॥ग्रंथं तगतार्थं॥प्रत्यक्षप्रमायांप्रसंगवारणायज्ञायमानेति॥ज्ञायमानंकरणंलिंगग्रहणादितज्जन्यइत्यर्थः॥ज्ञायमानकरणधूमादिजन्यमात्रकनिष्ठौप्रसंगवारणायतत्तत्सानुभवइति॥ प्रमाउंलक्षयति॥प्रमेति॥अयोगोऽसंबंधस्तेनव्यवच्छिन्नंयत्तत्प्रमाणमित्यर्थः॥एवं चश्रवणनिष्ठाप्रमासदावर्तंतइतिप्रमायोगव्यवच्छिन्नमीश्वरेऽपिप्रमाणं॥इंद्रियलिंगेऽपिप्रमाणंतयोर्व्यापारवतोःसद्भावेऽपिप्रमायोगव्यवच्छिन्नंचक्षुरादावप्यस्ति॥तथापिसाधनाश्रययोरन्यतरत्वेसतीतिविवक्षितमितिसदोषः॥तत्रायोगव्यवच्छिन्नंचक्षुरादायोगव्यवच्छिन्नपरत्वोवर्तंतइतितद्वारणायप्रमेति॥प्रमाप्रमाणमित्युक्तेफलेऽतिप्रसंगोऽतोऽयोगव्यवच्छिन्नमितिप्रत्यक्षलक्षणंसुगमं॥तदुदाहरणमाह॥तत्रेति॥अनुमानंलक्षयति॥ अनुमितीति॥प्रत्यक्षेतिव्याप्तिस्ततोनुमितीति॥अनुमानस्वरूपमाह॥तत्रेति॥व्याप्तिपक्षधर्मताभ्यांविशिष्टंलिंगंतस्यज्ञानमित्यर्थः॥अनित्यःशब्दःश्रावणत्वादितिस्वरूपासिद्धावतिव्याप्तिवारणायपक्षधर्मतेतिविशिष्टं॥अनित्यःशब्दःप्रमेयत्वादिसाधनेकोतिकयदासा ॥४२॥

यव्याप्तीति॥व्याप्तिविशिष्टंलिंगज्ञानमित्युक्तेअनित्यःशब्दःसामान्यवत्वेसतिचाक्षुषत्वादितिविशेष्यासिद्धौप्रसंगस्ततःपक्षधर्मतेति॥व्याप्तिंलक्षयति॥व्याप्तिश्चेति॥यःकश्चनसंबंधोव्याप्तिर्भवष्यतीतिअतउक्तंव्यापकस्यव्याप्याधिकरणेति॥व्याप्यंअधिकरणंयस्यसतथा॥साध्यसाधननिष्ठःसंबंधइत्यर्थः॥एवंचसोपाधिकमैत्रीतनयत्वादिसंबंधेऽतिव्याप्तिरतउक्तंउपाध्यभावविशिष्टइति॥व्याप्यव्यापकयोर्व्याप्यंसाध्यंसाधनंवाधिमतधर्मोविवक्षितो॥ पक्षधर्मतामाह॥पक्षधर्मत्वमितिति॥पक्षसंबंधःपक्षधर्मत्वमित्युक्तेपर्वतेतादावतिव्याप्तिरतोव्याप्येति॥व्याप्यव्यापकयोर्लक्षणमाह॥व्यापकमिति॥सुगमं॥उपाधिंलक्षयति॥उपाधिश्चेति॥अस्योदाहरणं॥मैत्र्याःससमःपुत्रःश्यामोभवितुमर्हतीति॥मैत्रीतनयत्वातुल्यनिदृश्यमानमैत्रीतनयवदिति॥अनुमानेज्ञातेधनपरिज्ञातिर्यदेववउपाधिः॥उभयसमीपस्थेसाधनेस्वधर्मव्याप्तिमादधतीत्युपाधिरित्युच्यते॥यथाजपाकुसुमंस्वसन्निहितस्यस्फटिकस्यलोहित्यमादधदुपाधिः॥अतोपाधिलक्षणंयोज्यते॥साधनस्यमैत्रीतनयत्वस्यव्यापकत्वेसतिसाध्येनश्यामत्वेनसमाव्याप्तिर्यस्यसतथा॥तथाचयत्रयत्रनश्यामत्वंतत्रतत्र

ज्ञाकाधनपरिणामः यथा मैत्रीतनये ज्ञामे॥ तथा यत्र यत्र ज्ञाकाधन्नपरिणामः तत्र तत्र नरत्वा
भावा मत्वं॥ यथा तत्रैव मैत्रीतनये इति साध्यसमव्याप्तिः॥ तथा यत्र यत्र मैत्रीतनयत्वं तत्र तत्र ज्ञाका
धन्नापरिणाम इति नाव्याप्तिः॥ पक्षीकृते मैत्रीपुत्रे ज्ञाकाधन्नपरिणतेरनिश्चियात्ततोयमुपा
धिः॥ व्यावर्त्तिकासाधनाव्यापकः उपाधिरित्युक्तेरनियतः दृष्टः कार्यत्वादुपचरितत्वेनुमाने
सावयवत्वमुपाधिः स्यात्तु भवति चायं साधनाव्यापकः॥ यद्धकार्यं तत्सावयवमिति व्याप्तेः
कर्मादेरपि चावादतउक्तं साध्यव्यापक इति॥ एवं च तत्र नाव्याप्तिः॥ सावयवत्वस्य साध्या
व्यापकत्वेपि साध्यव्यापकत्वात्तु॥ यद्यदनित्यं तत्तत्सावयवमिति व्याप्तेः॥ गंधादेरपि चात्तु
अतः सावयवत्वेन कार्यत्वेनोपाधिः॥ साध्यव्यापकउपाधिरित्युक्तेः पूर्वस्मिन्ननुमाने प्रमेयत्व
मुपाधिः स्यात्तु॥ यद्यदनित्यं तत्तत्प्रमेयमिति साध्यव्याप्तेः सत्वादतउक्तं साधनाव्यापकत्वे सतीति
एवं च नाव्याप्तिः॥ यत्कार्यं तत्तत्प्रमेयं न भवतीति साधनाव्यापकत्वाभावात्तु॥ प्रयत्नानन्तरीय
कत्वं नित्यत्वे सति कार्यत्वात्तु॥ अतः प्रमेयत्वं नोपाधिः॥ साधनाव्यापकत्वे सति साध्यव्या
पकउपाधिरित्युक्तेः पूर्वानुमाने एव दृष्टत्वमुपाधिः स्यात्तु॥ यस्य यद्धकार्यं तच्छब्दतरदिति

व्याप्तेः॥ दृष्टपक्ष एव व्यभिचारेण साधनाव्यापकत्वं॥ यद्धदनित्यं तच्छब्दतरदिति साध्यव्यापकत्वाच्च॥
तदुक्तं समेति॥ साध्यपुरःसरउपाधिपुरःसरोवयवस्य समव्याप्तिर्यथा ज्ञाकाधन्नयपरिणतिः
दृष्टतरत्वेतूयधपि साध्यपुरःसरा व्याप्तिरस्ति॥ तथापि यच्छब्दतरत्तदनित्यमितिउपाधिपुरःस
रा व्याप्तिर्नास्ति॥ आकाङ्क्षाव्यभिचारादतः समव्याप्त्यभावान्नायमुपाधिः॥ साध्यसमव्याप्तिरित्यु
क्तेनित्यपृथिवीसावयवत्वादत्र कृतकत्वमुपाधिस्यात्तु॥ साध्यसमव्याप्तिमत्वात्ततउक्तं साधन
व्यापकत्वेसतीति॥ कृतकत्वं च सावयवत्वस्य व्यापकमिति न साधनाव्यापकमतोनोपाधिः॥ ननूपा
धेः कथं हेत्वभासत्वं॥ व्याप्तिपक्षधर्मतयोरन्यतरस्याऽविद्यमानार्थविरुद्धानैकान्तिकत्वयो व्याप्तिर्विघटते॥ तथानन्नाकाधन्नपरिणामस्य द्वीवमात्रेणमैत्रीपुत्रत्वज्ञानस्य व्याप्तिर्विघटते॥
नह्यव्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वेनान्यस्य साध्यव्यापकत्वं विघटतेतिप्रसंगात्तु॥ नाप्य
सिद्धकालात्ययापदिष्टत्वतूपक्षधर्मता विघटते॥ उपाधिसत्वेपि मैत्रीपुत्रत्वहेतोपक्षनिष्ठत्वा
दतोयंनसर्वंकषश्चेतु॥ मैवं॥ व्यभिचारेणानैकान्तिकत्वेनोपाधेर्दूषणत्वात्तु॥ तथाहि॥ साध्यस्य व्या
पकउपाधिस्तत्पक्षेक्षणवर्तमानः स्वव्याप्यं साध्यमादाय व्यावर्तते॥ व्यापकनिवृत्तौ व्याप्यनिवृत्तेरव

६ विघटनात्तु॥ तथाहि॥ यथा ६

इयकत्वात्तु ॥ तथा च साध्याभाववति पक्षे विपक्षवृत्तेर्वर्तमानो हेतुः व्यभिचारी भवति ॥ तदुक्तं ॥ व्यभि
चारोऽनयं[illegible]पाधियोतिदोषतोऽति ॥ व्यभिचारोऽनयनत्वं हेतुः साध्यव्यभिचारी साध्यव्या
पकोपाधि[illegible]चारित्वाद्योयद्व्यापकव्यभिचारी सतद्व्याप्यव्यभिचारी ॥ यथा पृथिवीत्वव्यापकद्र
व्यत्वव्यभिचारी ॥ गुणत्वादिपृथिवीत्वव्यभिचारीति सामान्यतः ॥ विशेषोक्तमेत्रीपुत्रत्वंश्यामत्वं व्यभिचारि ॥ गौरीकाधन्यपरिणामश्यामत्वव्यभिचारित्वान्मैत्रेयत्ववदिति ॥ विपक्षबाधकस्तर्कः गौरीकाधन्यपरिणामनश्यामत्वयोर्वैधकृतान्नादेवकार्यकारणभावावगमाकभावेऽपि श्यामत्वासंभवः ॥ पक्षाकृतेमैत्रतनयेगौरीकाधन्यपरिणतेरनिश्चयेपिसाधनव्यापकत्वसंदेहादेव सव्यभिचारोपाधिः ॥ एवंविधविषयत्वभावत्वादैधनत्वादयोज्ञेया ॥ इयत्कमितिविस्तरेण ॥ ॥ ध ॥ ॥ ध ॥ केवलान्वयहेतुंलक्षयति ॥ पक्षव्यापकइति ॥ पक्षव्यापकः केवलान्वयी सुकेकेवलव्यतिरेकिव्यतिरेकिव्यभिचारतोऽपक्षस्थश्रीसुकं ॥ एवमुक्तेधूमानुमानेऽन्वयव्यतिरेकिणिअतोविपक्षबहिरन्यइति ॥ विपक्षबहिरन्यइत्युक्तेसर्वेक्षणिकंसत्वादियत्रध्वंसितेऽतिव्याप्तिरतःसपक्षस्थश्रीति ॥ विपक्षबहिरन्यःसपक्षस्थश्रीसुकेसृष्टोभिधेयःश्राक्षुषत्वात्तुघटवदितत्रअतोवक्ष्यतिपक्षव्यापकइति ॥ चा

॥८४॥

DR. BHAU DAJI

क्षुषत्वस्यपक्षात्निष्टत्वान्नदोषः ॥ व्यापकपदेनैवाभिधेयःश्राक्षोवर्णसुकत्वादितिभागासिद्धो व्युदासि ॥ एतन्नित्योकोवह्निरनुष्णःपदार्थत्वादितिबाधितेतिव्याप्तिरतोऽबाधितविषय इति ॥ एवमप्यभिधेयःश्राद्धःप्रमेयत्वादनभिधेयश्राद्धःश्रावणत्वाद्घटवदिति सत्प्रतिपक्षेतिव्याप्तिरतोऽसत्प्रतिपक्षइति ॥ ॥ छ ॥ ॥ केवलव्यतिरेकिणंलक्षयति ॥ पक्षव्यापकःसपक्षबहिरन्यइति ॥ विपक्षाध्यावृत्तेःकेवलव्यतिरेकीसुकेऽन्वयव्यतिरेकिण्यतिव्याप्तिरतःसपक्षबहिरन्यइति ॥ एतद्द्वयोर्वेदःसर्वज्ञकर्तृकश्राक्षुषत्वात्तु ॥ यःसर्वज्ञकर्तृकोनश्यवतिसश्राक्षुषोनभ्यवति ॥ यथाआत्मेयमितिधीप्रसंगःअतःपक्षव्यापकइति ॥ पक्षव्यापकइत्युक्तेकेवलान्वयिनिप्रसंगःअतःपक्षबहिरन्यइति ॥ एतद्द्वयोर्सर्वमनित्यंसत्वादित्यत्रप्रसंगःअतोविपक्षाध्यावृत्तइति ॥ अयंतुविपक्षाभावान्नविपक्षाध्यावृत्तेः ॥ विपक्षाभावस्यपक्षीकृतत्वात्तु अत्रत्योर्सर्वंकार्यंप्रधानजन्यंकार्यत्वादितिप्रसक्षबाधितेनुमानेप्रसंगःअतोऽबाधितइति ॥ एवमपिसर्वंकार्यंसर्वज्ञजन्यंकार्यत्वाद्धतिरेकगगनवत्सर्वंकार्यंसर्वज्ञजन्यंनभ

वतिप्रमेयत्वादाकाशवदितिसप्रतिपक्षेप्रसंगः अतोअसप्रतिपक्षइति॥ ॥७॥ ॥अन्वयव्यतिरेकिणोलक्षयति॥पक्षेति॥ पक्षव्यापकइत्युक्तेकेवलव्यतिरेकिप्रसंगेःअतःसपक्षस्यइतिति॥एतद्द्वयोक्तेकेवलान्वयिनिप्रसंगःअतोविपक्षाद्व्यावृत्तइति॥केवलान्वयिनिविपक्षाभावातुनतद्व्यावृत्तिः॥विपक्षातुव्यावृत्तइत्युक्तेपुनःकेवलव्यतिरेकिव्यतःसपक्षस्यइतिति॥एतद्द्वयोक्तेअनियतःनाष्टःचाक्षुषत्वेसतिसामान्यवत्वादित्यत्रासिध्यसेदंतोवक्ति॥पक्षव्यापकइति॥एतत्रयोक्तेपरमाण्वादिनियतःमूर्तत्वातुघटवदित्यत्रअन्वयव्यतिरेकिणिधर्मिगृहकमानाधितेतिव्याप्तिरतोमानाधितेति॥एवमपिनाष्टोनियतःकार्यत्वाज्जनियतःनाष्टःआकाशादितिसप्रतिपक्षेतिव्याप्तिरतोऽसप्रतिपक्षइति॥ ॥७॥ ॥०पक्षव्यापकत्वादिज्ञानायलक्षणमाह॥संदिग्धेति॥संदिग्धंसाध्यंयस्यसतथा॥तस्यभावस्तत्वं॥तेनेथंभूतलक्षणोतृतीयासंदिग्धसाध्यवान्पक्षइत्यर्थः॥उपात्तंघटादाकाशमतोविनिवृत्तं॥साध्यत्वेनेति॥एवंचसपक्षेतिव्याप्तिरुक्तस्यापिसाध्यवत्तयोपात्त ॥४५॥

त्वात्॥इत्थंभावतृतीयायामतुबर्थत्वस्योक्तत्वात्॥अतःसंदिग्धेति॥संदिग्धंत्वेनोपात्तंस्वाश्रयवृत्तिव्याप्यमतोवदतिसाध्यत्वेनेति॥अधिकरणंसपक्षत्वमित्युक्तेविपक्षेयस्यकस्याप्यधिकरणेतिव्याप्तिरतःसाध्येति॥एवंचतोनिश्चितेतिनिश्चितंयत्साध्यंवह्निमत्वादितस्याधिकरणमाधारःससपक्षइत्यर्थः॥निश्चितंचतत्साध्यानधिकरणंचेतिविग्रहः॥अनधिकरणमित्युक्तेअसंभवः॥विपक्षस्यापियत्किंचिदधिकरणत्वादतःसाध्येति॥एवमुक्तेवह्निमानयंपर्वतोधूमवत्वादितिप्रयोगेमाहानसहृदेपियदाकदाचिद्वह्निमत्वमस्तिनवेतिसंदेहस्तस्यविपक्षत्वंनास्तीतितत्राप्तिव्याप्तिस्तदर्थंनिश्चितेति॥पक्षादीनांत्रयाणामपितत्वेननिश्चितायामेवानुमितिजनकत्वात्साध्याभाववत्वेननिश्चितएवविपक्षइत्यर्थः॥अथरूपमनुमानंस्वार्थं॥नाष्टरूपमनुमानंपरार्थमित्यर्थः॥पंचावयवोपपेतंनाष्टरूपत्वे॥ननुनाष्टानामनुमानं॥किंमानुसंधानमंतरेणप्रमाजनकत्वात्तस्यलक्षणादिसाधकाह॥नाष्टस्यापीति॥नाष्टस्यानुमानंकुतःअनुमानंविषयत्वेनाविनाभावोपजीवकत्वेनवेत्यन्वयः॥अनुमानस्यविष

विषयत्वेन

यः पक्षोक्तः॥ स एव विषयो यस्य ज्ञाप्तस्य तत्स्य भावस्तत्वं तेनेत्यर्थः॥ हेतौ तृतीया॥ तथा च ज्ञाप्तेनुमानं प्रमाणे सति पक्षोक्तविषयत्वादनुमानवत्॥ तथा ज्ञाप्तेनुमानमविनाभावोपजीवकत्वादनुमानवदिति॥ अविनाभावमुपजीवती त्यविनाभावोपजीवकः कथमिति चेत्॥ इत्थं अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्रैतानि पदानि स्वस्मारितार्थसंसर्गज्ञानपूर्वकाणि॥ आकांक्षायोग्यतासन्निधिमत्पदत्वात्॥ गामानयेत्यादिपदवत्॥ पदार्थसंसर्गोहि वाक्यार्थः स चाविनाभावबलेनैव लिंगरूपेऽवगतः अतः ज्ञाप्तेनुमानमेवेत्यर्थः॥ तथा च लिंगरूपोवश्यं दृष्टस्यार्थस्य गमकत्वात्सर्वपक्षहेतुरसिद्ध इति द्रष्टव्यं॥ प्रतिज्ञादीनां लक्षणमाह॥ तत्रेति॥ वचनं प्रतिज्ञेत्युक्तेपटइतिवचनेतिव्याप्तिरतोवक्ति॥ पक्षेति॥ पक्षधर्मत्ववचनंहेतुरित्युक्तेपर्वतोग्निमानिति साध्यस्य पक्षधर्मतावचनेनतोलिंगस्येति॥ द्वयंपूर्ववत्॥ प्रतिज्ञादावतिव्याप्तिवारणायदृष्टांतेति॥ एवं च यथागौस्तथागवयइत्यादौ प्रसंगन्नतोनुमानावयवत्वमिति॥ प्रकरणंतु ज्ञातव्यलिंगस्येतिवानुषंज्ञनीयं॥ परामर्शस्तृतीयलिंगपरामर्शः वह्निव्याप्यधूमवानयमित्यादि॥ व्यावृत्तिः स्पष्टलिंगः संबंधेन तस्मादित्येवंरूपेऽप्रयुक्तेनिश्चि

तसाध्यवचनंनिगमनमित्यर्थः॥ प्रतिज्ञायामतिव्याप्तिवारणायनिश्चितेति॥ दृष्टांतेतिव्याप्तिवारणायलिंगेति॥ उपनयेतिव्याप्तिवारणायनिश्चितेत्यादि॥ प्रयुक्तेत्वंसमभिव्याहृतत्वं॥ हेत्वाभासंलक्षयति॥ अंगवैकल्यमिति॥ अंगानिपक्षधर्मत्वादीनितैकल्यंतदन्यतररहितत्वमित्यर्थः॥ अनिश्चितेत्वंसंदेहव्यक्तीतितज्ज्ञापकलिंगत्वेनेति॥ पक्षधर्मत्वानतिकचिदिसाठः तत्रापिपक्षधर्मतयेत्यर्थः॥ पक्षविपक्षस्यानिश्चितत्वमनैकांतिकव्यक्तीतितदर्थमात्रेति॥ अनैकांतिकानध्यवसितप्रकरणसमानांसंदेहकार्यकर्तृत्वेनसंदिग्धव्यपदेशविधायत्रितयंयदवलक्ष्यति॥ साध्येति॥ साध्यंचसाध्याभावत्वंसाध्योयस्यसःसाध्यतदभावसाध्यस्तस्यभावस्तत्वंविरुद्धेसाध्याभावसाध्यत्वं॥ असिद्धसदनुमानेनासाध्यसाध्यत्वंतन्निवारणार्थंउभयसाध्यत्वमुक्तं॥ तत्रप्रमेयत्वस्यानैकांतिकस्यसाध्यतदभाववद्वृत्तेर्नोभयसाधनसंभवात्॥ अनध्यवसितस्यपक्षमात्रवृत्तेर्नोभयसाधनसंभवात्॥ प्रकरणसमस्यसाध्यतदभावयोःसमत्वेनोभयसाधनसंभवादुभयसाध्यत्वं॥ अन्यतरनिश्चयाभावादेवचसंदिग्धत्वं॥ अपरंस्वयमूहनीयं॥ विस्तरभयात्तुनोच्यते॥ क्वचित्त्वनैकांतिकाअनध्यवसितयोःपृथक्लक्षणंदृश्यतेतदासंदिग्धत्वेनैवसत्प्रतिपक्षएवगृह्यतेः॥ पूर्वपा

ठ एवसार्वत्रिकः टीकांतरसंमत श्रेति॥ नाधं लक्ष्यति ॥ उपजीवेति॥ उपजीव्यो नाधिकबलेन प्रमा णेन निश्चितः साध्यविपरीतः साध्याभावो यस्य तत्वं तद्धि यथेः॥ साध्यविपरीतत्वं सर्वहि उधेपर्वते ष्वस्तीति अतः सदनुमानेति व्याप्तिवारणाय निश्चितेति॥ छल जात्यादिना निश्चित साध्यविपर्यो यस्य सदनुमानेति व्याप्तिवारणाय प्रमाणेति॥ सच्छब्दितपक्षेति व्याप्तिवारणाय योगजधर्मा नुगृहीतस्येति॥ ६२॥ ॥७ तर्कं लक्षयति॥ अनिष्टेति॥ अनिष्टं व्यभिचारकं धूमाभावादिरूपं तस्य प्रसंजनं तर्क इत्यर्थः॥ तेन नास्त्यग्निरित्यादिमतानुज्ञायां अतिव्याप्तिवारणाय व्यापकेति॥ महाह्रदवह्निनास्तिधूमोपि नास्तिइत्यादि प्रसंजनेनेति व्याप्तिः तदर्थं अनिष्टेति॥ प्रसंजनं लक्ष्यति॥ तुल्येति॥ समानदेश कालावच्छेदेन अभावयोर्व्याप्यत्वमिति यावत्॥ यत्र यदा वह्निर्नास्ति तत्र तदा धूमोपि नास्तीति प्रतीयते॥ एवंचाभावयोर्मध्ये तुल्येन हेतुनाथप्रसाधवचनं प्रतिकूलाभाववचनं तत्प्रसंजन मित्यर्थः॥ प्रसभावचनं प्रसंजनमिति के यदि सुखं तर्हि दुःखं नवेति वचनेति व्याप्तिः अतोऽभा वयोरिति॥ एवमुक्तेयत्नानभिर्नस्यात्तर्हि ज्ञानं नस्यादितिवचने प्रसंगस्ततः तुल्येनेति॥ व्या प्याभावाकांक्षे व्यापकाभावारोपः प्रसंजनमिति रहस्यं॥ अभावयोः प्रसाभाववचनमित्यत्तदाहुरन्या भिप्रायेणवक्तुतन्तु॥ यदि पीतं जलं परमेश्वरधर्मेण नहि तदवच्छिन्नमामपि दहेदिद्यादि प्रा

स्वप्नस्य लक्षणमाह॥ निद्रेति॥

वयोरपि प्रसंजनस्यदृष्टत्वादिति॥ निद्रादोषादुष्टं यदंतष्करणं मनस्तज्जन्यं ज्ञानं स्वप्न इत्यर्थः॥ जाग्रद्घटज्ञानव्युदासायतष्करणमिति॥ जाग्रत्सुखादिज्ञानव्युदासायदुष्टेति॥ जागन्मानसंभ्रम व्युदासायनिद्रेति॥ के यनिद्रेयतआह॥ योगजेति॥ योगाभ्यासेनजानिनोधर्मो योगजस्तेनानु गृहीतस्यासहकृतस्यमनसोनिरिंद्रियव्यपदेशार्हेणेंद्रियसंबंधरहितस्यछलवर्तमानंनिद्रेत्यर्थः॥ समाधावतिव्याप्तिवारणाययोगजधर्मानुगृहीतस्येति॥ गृहीतंनिर्विकल्पकमिति के चिन्मतं व्याप्तिरतोवक्ष्यपदं॥ एवंचसविकल्पकप्रमायांअतीतमात्रेति॥ इंद्रियादौप्रसंगवारणायगृहीत मिति॥ निर्विकल्पकेतिव्याप्तिवारणायसविकल्पकेलक्षणेविशेषणंदं॥ वक्ष्यमाणंप्रत्यभिज्ञा त्मकेअक्षिज्ञायामतिव्याप्तिरतोजातीतस्यादि॥ उत्तरंतत्रयंसुगमं॥ उहनमूहइतिव्यत्पत्त्या तल्लक्षणंस्मृतिमात्रेति मतेऽनध्यवसायंलक्ष्यति॥ अनालिंगितेति॥ अनालिंगितेस्पष्टउन्मी

य टीयस्थाणवधारणज्ञानस्यतदनध्यवसायइतिसमासः॥ नतुकोटिद्वयसंबंधएवनास्तीति॥ तथाचसतिसंशयांतर्भावानुपपत्तेः॥ अनवधारणज्ञानंस्थाणुपुरुषसंदेहेतिव्याससतोना

व लिंगितेत्यादि॥ सुखभेदोलक्ष्यति॥ प्रयत्नोत्साहेति॥ प्रयत्नोपाधेःसाधनंस्त्रगादितदधीनंत

ज्ञानमित्यर्थः॥ सुखं सांसारिकमित्युक्ते परस्मिन्मते नित्यसुखेति व्याप्तिरतः साधनाधीनमिति एवमुक्ते स्वर्गो अतो वक्ति॥ प्रयत्नोत्पाद्येति॥ इच्छामात्राधीनं वैविग्रहः॥ साधनसाध्यत्वं इच्छाधीनसाधनसाध्यत्वात्सांसारिकपक्षीकृतिद्वारायमात्रेति॥ इदत्वमेतल्लक्षयति॥ सांसिद्धिकत्वमिति॥ सुगमं लक्षणत्रयं॥ इदत्वमित्युभयत्रापि संबंधनीयं॥ अतो गगनालोकयोर्न प्रसंगः॥ गवेगभावनालक्षणं सुगमे॥ इच्छयापादको गुण इत्येकं॥ इच्छापादकः संस्कारः परमितिलक्षणद्वयं दृष्टव्यं॥ इयेतिव्याप्तिवारणायगुण इतिवा॥ संस्कार इतिवाविरोधः॥ ऋजुत्वापादकः संस्कारः स्थितस्थापक इति॥ काचित्साढः सतुवेष्टनजनकेऽव्यापक इत्युपक्षणीयः॥ तस्मादिच्छापादको गुणः संस्कारः स्थितस्थापक इत्येवलक्षणंविभागेनदृष्टव्यं॥ इच्छावांतरभेदानामनुक्तानिलक्षणानिस्वरूपमिहैवदृष्टव्यानि॥ गुणानांगुरुत्वमव्यापकत्वादिलक्षयति॥ अव्यापकत्वमित्यादिना॥ समानोदेशोयस्यतस्यभावःसादृश्यं एकनिष्ठत्वमितियावत्॥ सादृश्यरूपंसादृश्यंवर्ततइतिजातावतिव्याप्तिः॥ पटत्वाभावसादृश्यं घटत्वस्यवर्तते ॥४८॥
तएववर्ततइतिके चित्॥ एकस्मिन्नेवघटेऽङ्गुलिसंयोगतदभावौवर्ततइतिसंयोगोव्यापकः॥

एवमन्यत्रापि॥ व्यापकलक्षणंस्पष्टं॥ विहितादित्रयंसुगममेव॥ जात्युपाध्योर्लक्षणमाह॥ निबंधकमिति॥ बाधकंतु॥ व्यक्तेरभेदकत्वसंकरव्यानवस्थितिः॥ रूपहानिरसंबंधोजातिबाधकसंग्रहइति॥१॥ व्यक्तेरभेदआकाङ्क्षादौ॥ तुल्यत्वंहेतुत्वकरत्वादौ॥ संकरोभूतत्वमूर्तत्वादौ॥ तथाहि॥ भूतत्वंमूर्तत्वंपरिहायाकाशेऽमूर्तेवर्ततेमूर्तत्वंचभूतत्वंपरिहायमनस्यभूतेवर्ततेतदुभयंपृथिव्यादिचतुष्टयेवर्ततइतिपरस्परपरिहारस्थितावसमानाधिकरणयोर्धर्मयोःसमानाधिकरण्यलक्षणंसांकर्यंभूतत्वमूर्तत्वयोर्भवति॥ तदुक्तं॥ अन्योन्यपरिहारेणाभिन्नयोर्निवेशिनोः॥ सामान्ययोःसमावेशोजातिसांकर्यमुच्यतइति॥१॥ अतोऽन्योन्यपरिहारेणावर्तमानयोःसामान्ययोरेकत्रसमावेशायोगादतएतदुभयमुपाधिरूपंसामान्यमेवात्रादोहरणंद्रष्टव्यमिति॥ अनवस्थितिर्जातावंगीकारे॥ रूपहानिर्विनाशादौ॥ असंबंधःसमवायादौ॥ समवायेसमवायानंगीकारात्॥ एवंविधजातिबाधकाभावेयत्सामान्यंसजातिः॥ बाधकेतुऔपाधिकंसामान्यमितियर्थः॥ घटाद्यभावेतिव्याप्तिनिरासायनीलइतेति॥ एवंससंबंधवस्तुतआरोपितेति॥ आरोपित

नीलरूपांधकारइत्युक्तेभानोपितनीलरूपस्पटिकादावतिव्याप्तिरतोभावइति॥ज्ञानसंबंधंलक्ष्य
यति॥ज्ञानेति॥सुगमं॥ज्ञानविषयत्वप्रसंगेनप्रमाविषयत्वमपिलक्षयति॥तत्वज्ञानेनेति॥
तथापिनव्याप्तिः॥तस्यापिधर्म्मोक्तत्वज्ञानवेद्यत्वादतोनियमेनेति॥नियमेनसाकल्येनेत्यर्थः॥
अवच्छेदकत्वंव्यावर्त्तकत्वंविशेषणत्वंविशेषयत्वमिति॥यावत्तच्चसंदेहविषयेष्वस्तीयनउक्तंत
त्वज्ञानेनेति॥*॥यदुक्तंसंख्यायाएतंगुणइतितत्रसंख्यायागुणोतथापिगुणादौकथंसंख्या
व्यवहारइत्यतआह॥गुणादिष्विति॥संख्यायासहगुणादीनांप्रत्यासत्तिरेकार्थसमवायल
क्षणात्तन्निबंधनंस्तकारणइत्यर्थः॥प्रत्यासत्तिसंबंधः॥यद्वासंख्येवप्रत्यासत्तिः॥उप
संहरतिः॥अतएवेति॥व्यवहारव्याप्तिरूपः॥अतएवन्यायादित्यर्थः॥कारणंलक्षयति॥का
र्योत्पादकत्वमिति॥उत्पत्तेःसापेक्षेतत्वात्कार्यपदं॥कार्योत्पादकंसमवायिकारणमिसु
क्तंनिमित्तादौप्रसंगोतःस्वसमवेतेति॥अवधृतंनिश्चितंसामर्थ्यंयस्यतत्तथाएवंविधंवर्त
समवायिकारणप्रत्यासन्नंचेतिविग्रहः॥तावत्सुक्तेसमवायिनिअतिव्याप्तिरूतोवक्ति॥स
मवायिकारणप्रत्यासन्नमितिसमवायिकारणप्रत्यासन्नत्वंद्विधा॥कार्यकार्थसमवा

DR BHAU DAJI

यो॥यथातंतुसंयोगस्यपटेन॥कारणेकार्थसमवायोयथातंतुरूपस्यपटेनपटरूपसमवायि
कारणेनपटेनतंतुषुसमवायः॥समवायिकारणप्रत्यासन्नमितिसूत्रेपटंप्रतितंतुरू
पस्यतंतुत्वस्यवाकारणासापत्तिरतोवधतेति॥तयोश्चान्यथासिद्धत्वान्नावधतसामर्थ्यं॥
निमित्तकारणंलक्षयंस्पष्टं॥मूर्त्तत्वंलक्षयति॥इयत्तेति॥इयत्तापरिछेदः॥अविभुत्व
मितियावत्॥तेनावछिन्नंयत्परिमाणंतेनयोगइत्यर्थः॥आकाशादौअतिव्याप्तिवारण
यइयत्तावछिन्नेति॥*॥मूर्त्तलक्षणंस्पष्टं॥कारणप्रसंगात्सामग्रीलक्षयति॥कार्यमिति॥
कार्यव्यभिचारिणीत्यर्थः॥सर्वलक्षणमूलभूतोहेत्वाभासलक्षणमाह॥संज्ञेति॥लक्षणो
क्तिव्याप्तिवारणायसंज्ञामात्रेऊक्ति॥एवंलक्षणमभिधायकिंचित्साधर्म्यंचदर्शयन्सूत्रे
तिगुणादीनांद्रव्येषुसन्निवेशमाह॥रूपेत्यादिना॥पृथिव्युदकात्मनांचतुर्दशगुणावं
त्वं॥तेजसेकादशगुणाः॥वायोनव॥ईश्वरमनसोरष्ट॥गगनेषट्॥दिक्कालयोःपं
चेति॥इदमेवतद्धर्तासाधर्म्यं॥अन्यापेक्षयाचवैधर्म्यं॥कर्माश्रयमाह॥कर्मेति॥

द्रव्याणामेतत्साधर्म्यमितरापेक्षयाचवैधर्म्यमित्यर्थः॥ इतरेषांतद्भावंनिष्क्रियत्वंसूचितं॥ द्रव्यादीनांत्रयाणांसाधर्म्यमाह॥ सामान्यमिति॥ इतरेषांनिःसामान्यत्वंसाधर्म्यमुक्तंभवति॥ विशेषाणांसाधर्म्यंवैधर्म्यंचाह॥ विशेषाइति॥ समवायाभावयोःसाधर्म्यमाह॥ समवायेति॥ कार्यद्रव्यसाधर्म्यमाह॥ द्रव्यंत्विति॥ अकार्यद्रव्यसाधर्म्यमाह॥ अकार्यमिति॥ ग्रंथःस्पष्टः॥ एवंकिंचित्साधर्म्यमभिधायद्रव्यादीनांविनाशमाह॥ विनाशइति॥ समवायिनाशात्द्रव्यनाशः॥ यथातंतुनाशात्पटनाशः॥ असमवायिकारणनाशाद्यथा॥ परमाणुसंयोगनाशाद्द्व्यणुकनाशः॥ गुणस्यविनाशंनिरूपयति॥ गुणस्येति॥ दृष्टांतेश्रूयमाणस्यकारणपदस्यप्रत्येकमभिसंबंधः तेषांनाशश्चाविरोधिगुणश्रुतिर्लिंगम्॥ घटादिगुणानांसमवायिघटादिनाशात्तुनाशः॥ आद्यसंयोगविभागासमवायिकारणनाशात्संयोगइतिसंयोगविभागजोविभागोयोनाशः॥ अपेक्षाबुद्धिनिमित्तकारणनाशात्परत्वापरत्वबुद्धिरपृथक्त्वादी

नानाशः॥ उत्तरद्रव्यारब्धेविरोधिनापूर्वद्रव्यस्य॥ उत्तरज्ञानेनपूर्वज्ञानस्य॥ दुःखादिविरोधिगुणात्सुखादिनाशः॥ कर्मणोनाशमाह॥ कर्मणइति॥ समवायिनाशोयथा॥ विनष्टेद्रव्येच्छेद्रव्यगतकर्मणःअसमवायिनाशात्तु॥ यथातूरवेगनाशात्तद्गतकर्मनाशः॥ वेगवतःशब्दादेःकर्मणोविरोधितूरसंयोगान्नाशः॥ अभावस्यविनाशमाह॥ प्रागिति॥ अन्योन्याभावः॥ कश्चिन्नतेनित्यः॥ नहिपटेनष्टेतदन्योन्याभावोनश्यति॥ तदाविनष्टेघटेपटतादात्म्यापत्तेः॥ अन्योन्याभावाभावस्यतादात्म्यरूपत्वात्तु॥ तथापितत्प्रतियोगिनाशात्सोऽपिनश्यतीत्यभिप्रायेणोक्तं॥ उत्पत्तिंनिरूपयति॥ उत्पत्तिरिति॥ गुणस्येतिःस्पष्टोग्रंथः॥ गुणस्येति॥ समानजातीयंतंतादिरूपादिपटादिरूपाद्यसमवायिकारणं॥ असमानजातीयंद्व्यणुकपरिमाणंप्रतिपरमाणुद्वित्वं॥ सुखादिकंप्रत्यात्मनःसंयोगः॥ संयोगविभागवेगानांचकर्मासमवायिकारणं॥ साधारणंनिमित्तकारणमाह॥ निमित्तेति॥ आदिशब्देनदेशकालअदृष्टादि॥ अभावस्योत्पत्तिमाह॥ अन्योन्याभावेति॥ अभावस्यकापिसमवा

याभावात्तु ॥ नसमवायिकारणं ॥ समवायिकारणाभावादेव चतत्सामान्यंनसमवायिकारणमपि नतिकेवलनिमित्तादेवोत्पत्तिरित्यर्थः ॥ अथेतराभावप्रागभावयोर्नोत्पत्तिः ॥ यथाप्यन्योन्याभावस्यापिनोत्पत्तिः ॥ नहिघटरूपंप्रतियोग्यनुत्पन्नावन्योन्याभावोनास्ति ॥ तथाचानुत्पन्नोघटो घोनभवतिइतिप्रसंगोनस्यात् ॥ तथापिघटोऽसन्नेवअयमयंनभवतीतिस्पष्टंज्ञायतइतितदनुसारेणोत्पत्तिरुक्ता ॥ ॥ ६२ ॥ ॥ नन्वभावोनामकश्चित्सदाथोंऽस्ति ॥ येनतस्योत्पत्तिविनाशविचारःकर्तव्योभवेत् ॥ तथाहि ॥ भावांतरमेवभावोतरापेक्षयाऽभावइतिव्यवक्रीयते ॥ परंतुनव्यवहारविषयःपदार्थांतरमस्ति ॥ मानाभावात् ॥ नास्तीतिप्रत्ययोवानास्तीतिव्यवहारोन्यथानुपपत्तिःतत्रमानमितिचेत् ॥ नप्रत्यक्षस्यार्थापत्तेश्चभूतलादिभावालंबनत्वेनान्यथासिद्धत्वात् ॥ ननुनास्तीतिप्रत्ययव्यपदेशोभूतलालंबनत्वेनघटवत्सपिभूतलेऽभावप्रतीतिव्यवहारोनस्यातामितिचेत् ॥ मैवं ॥ केवलभूतलस्याभावव्यवहारहेतुत्वात् ॥ घटवद्भूतलादन्यभूतलंकेवलं ॥ तत्रान्योन्याभावव्यवहारोघटपटादिस्वरूपेण संसर्गाभावव्यवहारस्तुकपालभूतलादिनाभवति ॥ कपालेप्रागभावप्रध्वंसाभावयोर्यो ॥ ५१ ॥

व्यवहारः ॥ भूतलेयंतादृग्भावव्यवहारः ॥ अतोनास्तिनिर्भावेमानंकिंचित्स्यामइतिप्राभाकराः ॥ यथाहुः ॥ भावांतरमभावोहिकयाचिद्व्यपेक्षया ॥ भावांतरादभावोन्यानकश्चिद्विरूपकादिति ॥ (१) अत्रोच्यते ॥ अभावस्तावदतिरिक्तोभ्युपेयः ॥ अन्यथातत्सत्तीतिव्यवहारयोरनालंबनत्वंस्यात् ॥ तथाहि ॥ व्यवहर्तव्यपदार्थः सानसाध्यः ॥ नचघटादिस्वरूपंभूतलंवाव्यवहर्तव्यं ॥ किंत्वभावः नज्ञानंचतन्नविनानभवति ॥ अतोऽभावोज्ञानविषयोंऽभ्युपेयः ॥ किंचज्ञानादन्यभावत्वेसतीतियोगिलापत्तिः ॥ अभावस्यहिघटाभावःपटाभावइतिवा प्रतियोगिसापेक्षित्वात् ॥ अथचित्स्वस्वरूपस्यान्योन्याभावत्वेदृगात्मकखंडनमानीतिधीकृतएकानेकजिज्ञासानस्यात् स्वरूपग्राहकेनेवान्योन्याभावरूपभेदग्राहकेनापि ॥ अन्यच्चज्ञानंयंसपेइतिभ्रमानस्यात् ॥ स्वरूपग्राहकेनेयंरज्जुरितिज्ञातत्वात् ॥ विवेकाग्राहाभावात् ॥ नास्त्येवविभ्रमोममेतन्मनिज्ञानांयथार्थत्वादितिचेत् ॥ नरज्जुर्मयासर्पोज्ञातइतिसर्वलोकानुभवबाधप्रसंगात् ॥ लौकिकपरीक्षकसिद्धविभ्रमानंगीकारेगुरोरपिलघुत्वापत्तेश्च ॥ अपिचकेवलंभूत

लभावइत्यत्र किमिदं केवलं ॥ भूतलमात्रं चेत् घटवत्तत्रापि प्रसंगात् तु ॥ अभावाधारभूतलमिति चेत् ॥ अभावस्वीकारापत्तेः ॥ घटवद्भूतलभिन्नं भूतलं केवलमिति चेत् ॥ तर्ह्यभावादि
रूपस्वीकारापत्तिः ॥ अभावाधारत्वज्ञानमत्रेष्टं घटवद्भूतलभिन्नत्वज्ञानाभावात् तु ॥ तस्मा
द्यत्रैवहानान्यथानुपपत्तिर्लोऽभावोऽभ्युपगंतव्यः ॥ अतस्तत्रेयमनुपलब्धिरेव प्रमाणं
लः ॥ ननु भावत्वाभावोधिकः ॥ तथापि तद्भूतलं प्रमाणं किमिति चेत् ॥ क्वचित्प्रत्यक्षं यथेहभू
तले घटो नास्तीति ॥ क्वचिदनुमानं ॥ यथा कारणाभावेन कार्याभावः ॥ ननु भूतले घटा
नुपलब्धेर्न प्रत्यक्षेऽक्षेंद्रियाभावयोः संबंधानिरूपणात् तु ॥ अपितु योग्यानुपलब्ध्यानुगत्व
ते ॥ इंद्रियं चाधारमात्रग्रहउपक्षीणं ॥ ननु तर्हि अंधस्यापि चक्षुरिंद्रियाधारपटग्रहे नीलरूपा
प्रतियोगिस्मरणेन नीलाभावग्रहप्रसंगः ॥ मम मतं चक्षुषोऽभाव
ग्राह्यं प्रसंग इति चेत् ॥ उच्यते ॥ इहभूतले घटो नास्तीति ज्ञानमिंद्रियजन्यं अपरोक्षत्वात् रूपज्ञा
नवत् इत्यनुमानादभावस्येंद्रियग्राह्यत्वं ॥ नचापरोक्षत्वमसिद्धं ॥ इंद्रियान्वयव्यतिरेकानुविधा

स्यतन्त्रथा ॥ ज्ञाताकादीनामितरव्याकृत्यासहैववर्तमानत्वनियामाभावात् तु ॥ अवच्छेदकंव्याकर्तृ
त्वमिति व्याप्तिवारणायाधिकरणमिति ॥ व्यधिकरणंलक्षयति ॥ भिन्नेति ॥ स्पष्टं सामानाधि
करण्याच्छेदितमधिकरणंलक्षयति ॥ जातीति ॥ जातिसाप्रसाक्तिः संबंधोयस्यतच्चाधिक
रणत्वमित्यर्थः ॥ यद्वा अधिकरणमधिकरणनिष्ठोधर्मः सचजातिनिबंधनएवेत्यर्थः ॥ ननु जा
तिप्रसाक्तेसामान्यादावभावात्तस्याधिकरणत्वंनस्यात् तु ॥ तथाचप्रमेयंसामान्यं अभिधेयं
सामान्यंइतिविनिष्टप्रत्ययोनस्यात् तु ॥ सामानाधिकरण्याभावात् तु ॥ नचसंयोगादिसंबंधाभा
वात् तु ॥ प्रमेयत्वस्यानधिकरणमेवसामान्यादीतिवाच्यं ॥ अभावेसमवायोऽर्थसंगीकृत्स
ूचसंबंधस्यसत्वात् तु ॥ अन्यथाभूतलेऽभावइतिधीर्नस्यादितिचेत् ॥ नैवं ॥ प्रमेयतादेरपिजा
तित्वात् तु ॥ प्रमात्वमेवप्रमाविषयेस्वरूपसंबंधेनवर्तमानंप्रमादारापरंपरयावर्तमानत्वात् तु ॥ उ
पाधिव्यपदेशंलभते ॥ एवमभिधात्वमेवाभिधेयत्वं ॥ पाकत्वमेवपाचकत्वं ॥ परंपरया
पाकक्रियासंबंधात्तदितिवर्तमानंउपाधिविमुच्यते ॥ नचैवंसामान्यादेर्ज्ञातासाधारत्वाज्ज्ञातिर
त्वप्रसंगेऽप्यसिद्धांत इतिवाच्यं ॥ साक्षात्संबंधाभावेनज्ञातित्वव्यपदेशाभावात् तु ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तस्मात्सर्वपदार्थानां संबंधोस्त्येवेति सामान्यादिनामधिकरणत्वंनविरुध्यमिति॥ प्रमेयंनाम
मितिव्युत्पादनेपिघटिष्यते॥ अथवाज्ञातासहैकार्थसमवायलक्षणप्रत्यासत्तिसामा
न्यादावस्तीतितेषामप्यधिकरणत्वंनव्याहन्यते॥ यद्वासंयोगसमवायसंबंधाभ्यामेवाध
रत्वमधिकरणत्वंमतंसामान्यादेस्तदौपचारिकमेवेतिनिषेधं॥ प्रत्यासत्तिप्रसंगेनबुद्धिस्थं
विभुत्वंलक्षयति॥ सकलेति॥ घटादावतिव्याप्तिवारणायसकलेति॥ संयोगोनामयुतसिद्धि
स्तत्स्तांलक्षयति॥ विद्यमानेति॥ पृथग्विद्यमानयोःपदार्थयोःकुंडबदरयोरिवेत्यर्थः॥
तत्रतियोगिद्वयायुतसिद्धिंलक्षयति॥ अविद्यमानयोरिति॥ पृथग्विद्यमानयोरित्यर्थः॥
पृथक्पदाभावेऽसंभवएवस्यात्॥ तदुक्तमयुतसिद्धिरपृथक्सिद्धिरिति॥ आधाराधे
यादिसंज्ञाकथनंन्यायशास्त्रंसुबोधमित्युक्तं॥ तत्रकिंन्यायशास्त्रमितिसतआह॥ साधनेति॥ साधनस्यसु
खदुःखाभावसाधनस्य॥ श्रेयोभिधायकंश्रेयःसंबंधबोधकंन्यायशास्त्रमित्यर्थः॥ तथाहि॥ ज्यो
तिष्टोमेनस्वर्गकामोयजेतेत्यादिनाऽऽगमेनयागस्यसंबंधोबोध्यतेअतःसाधनश्रेयोबोधा
यकंन्यायशास्त्रमित्यर्थः॥ तथाचोक्तंप्रवृत्तिर्वानिवृत्तिर्वानित्येनकृतकेनवा॥ पुंसांयेनोपदिश्यतत्

छास्त्रमभिधीयतइति॥ ७॥ अनिष्टबोधकवचनस्यन्यायशास्त्रत्वमाभूदितिसाधनेत्युक्तंवदन्वाच्यो
क्षितपदार्थबोधकत्वाद्वैद्यकादिकंग्रंथोन्यायशास्त्रंभवतीति॥ समासतोग्रंथस्यनामधेयंकुर्वन्ग्रंथ
मारभतेसप्तेति॥ जंबुद्वीपेकुरुक्षेत्रंचशाकद्वीपेशाल्मलिपुष्करेइतिसप्तद्वीपाद्यर्थसप्तधा
रापृथिवीयावद्वर्ततेयावच्चसप्तधान्यानुकूलपर्वतामहेंद्रमलयादयः॥ तावत्कालमा
चंद्रार्कमितियावद्दियंससपदार्थीवस्तूनांपदार्थानांप्रकाशिकासिद्धान्तसायांलोट्॥ ७
माधवान्यायतींद्रोऽकृष्णानंदनिवासिनः॥ कृतासप्तपदार्थीस्तुटीकेयंमितभाषिणी॥ ८
श्रीमन्मा[illegible]साधुवाक्यरचितांचातुर्यभावस्फुटांक्षावाभावपदार्थबोधविदुरज्ञानक्षण
दीपिकां[illegible]ज्ञानातितमोभिभूतविनयेस्वल्पांबहुव्यापिनींकृतेमांमितभाषिणींकुरु
ध्वंतापनुयंतुतर्केज्ञनाः॥ ॥ ९॥ ॥ ७॥ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमाधवसरस्व
तीविरचितासप्तपदार्थीटीकामितभाषिणीसंज्ञासमाप्ता॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥